# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा – शास्त्री-1** | **सत्रम् – 1** | **गुणाः - 70** |
| **विषयः –** पुराणेतिहासः | **प्रश्नपत्रम् - 5 - CC - 1.1.1** | **समयः- 11:30 तः 2:30** |
| **दिनाङ्कः- 14/10/2019** | **सन्दर्भग्रन्थः –** माहात्म्यसहितः भागवते प्रथमस्कन्धः | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या । 10**

1. यं प्रव्रजन्तमनुपेतमपेत कृत्यं द्वैपायनो विरहकातर आजुहाव ।
   पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि ।।
2. भाग्योदयेन बहुजन्म समर्जितेन सत्सङ्गमं च लभते पुरुषो यदा वै ।
   अज्ञानहेतुकृतमोहमदान्धकारनाशं विधाय हि तदोदयते विवेकः ।।
3. विश्वासो गुरुवाक्येषु स्वस्मिन्दीनत्वभावना ।
   मनोदोषजयश्चैव कथायां निश्चलामतिः ।।

**प्र-2 देवर्षिनारदेन कृतं भक्त्याः दुःखनिवारणं लिखत । 10**

**अथवा**

**धुन्धुकारीगोकर्णयोः जन्मकथां विलिख्य गोकर्णगीतां लिखत ।**

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं व्याखा कार्या । 10**

1. निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
   पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ।।
2. स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे ।
   अहैतुक्यप्रतिहता ययाऽऽत्मा सम्प्रसीदति ।।
3. सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य ।
   स्थितवति परसैनिकायुरक्ष्णा हृतवति पार्थसखे रतिर्ममास्तु ।।

**प्र-4 भगवद्कथामहिमानं विलिख्य भगवतः विविधावताराणां वर्णनं कुरुत । 10**

**अथवा**

**उत्तरास्तुतिं कुन्तिस्तुतिं भीष्मस्तुतिं च वर्णयत ।**

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं व्याख्या कार्या । 10**

1. भवद्विधा भागवतास्तीर्थभूताः स्वयं विभो ।

तीर्थीकुर्वन्ति तीर्थानि स्वान्तः स्थेन गदाभृता ।।

2. अहस्तानि सतहस्तानामिपदानि चतुष्पदाम् ।
फल्गूनि तत्र महतां जीवा जीवस्य जीवनम् ।।

3. अहं हि पृष्टोऽर्यमणो भवद्भिराचक्ष आत्मावगमोऽत्र यावान् ।
नभ: पतन्त्यात्मसमं पतत्त्रिणस्तथा समं विष्णुगतिं विपश्चितः ।।

**प्र-6 कस्याप्यैकस्य सविस्तरमुत्तरं लिखत । 10**

**1. परीक्षितः जन्मकथां लिखत ।**

**अथवा**

**2. पृथ्विधर्मयोः सवादं विलिख्य परीक्षितः शापकथाप्रसङ्गं वर्णयत ।**

**(चतुर्थान्वितिः - युनिट-4 )**

**प्र-7 दशानां एकवाक्येन उत्तराणि लिखत । 10**

1. सनत्कुमाराः कति सन्ति
2. अनुपेतः कः
3. आत्मदेवस्य पत्न्याः नाम किम्
4. भक्तिविषये प्रमाणभूताः काः
5. कलौ कस्य महिमा
6. शौनकादिऋषीणां सङ्ख्या का
7. भगवतः मुख्यावताराः कति
8. कस्य पूर्वचरितं श्रृत्वा व्यासः भागवतमलिखत्
9. उत्तरायाः पुत्रः कः
10. भीष्मस्तुतौ कति श्लोकाः सन्ति
11. कस्योपदेशेन गान्धारीधृतराष्ट्रौ वनं गतौ
12. विष्णुरात अर्थात् कः
13. परीक्षित् शब्दस्य पञ्चमी एकवचनं किम्
14. कति स्थानेषु कलिः वसति
15. प्रथमस्कन्धे कति अध्यायाः

**************